# Shri Lakshmi Hridaya Stotram

# श्रीलक्ष्मीहृदयस्तोत्रम्

## Document Information

Text title : lakShmIhRidaya stotram

File name : laxmiihridaya.itx

Category : hRidaya, devii, lakShmI, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, N.Balasubramanian, PSA Easwaran

Translated by : N.Balasubramanian

Description-comments : should be used with nArAyaNahRidayam

Latest update : November 06, 2004, March 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2023

*sanskritdocuments.org*

# Shri Lakshmi Hridaya Stotram

# श्रीलक्ष्मीहृदयस्तोत्रम्

आद्यादि श्रीमहालक्ष्मीहृदयस्तोत्रम् ।

। श्रीगणेशाय नमः ।

। हरिः ॐ ।

INTRODUCTION:- The following abbreviations are used in the comments that follow. 1- Narayana Hridayam - NH. (2) Laxmi Hridayam - LH (3) Vishnu Sahasranama with the commentary of Shri Shankaracharya - VS. (4) Bhagavad Gita - BG. (5) Shrimad Bhagavatham - BH (6) Lalitha Sahasranamam - LS. (7) Vivekachudamani of Shri Shankaracharya - VC. (8) Katha Upanishad - KU. (9) Mundaka Upanishad - MU

LH:- Laxmi Hridayam stotram is unique in that it is coupled with another stotram Narayana Hridayam to form a pair. They are found in the Atharva Rahasyam. They were given out by sage Bhargava.
The final part of NH says that NH is to be recited first, to be followed by the recital of Laxmi Hridayam and again the recital of theNH. This is not to be recited separately as a single piece.
This is to stress the fact that Lord Narayana and Laxmi are indeed one though spoken of as two different deities.
NH and LH belong to the category of stotram स्तोत्रम् .
The appellation stotram, stuti and stavam all describe a hymn only. स्तवः स्तोत्रं नुतिः स्तुतिः । says Amara, the Sanskrit lexicon. They all narrate the qualities of a deity. गुणसङ्कीर्तनम् is stotram, says Shri Shankaracharya in his commentary to Vishnu Sahasranama.

NARAYANA HRIDAYAM AND LAXMI HRIDAYAM:- Narayana Hridayam (NH) and Laxmi Hridayam (LH) form a pair of very valuable and sacred hymns. NH is the

shorter one. It consists of only 37 verses. LH is longer and consists of 108 verses. The word (हृदयम्) hridayam is popularly taken to mean the heart. The word also is used to mean secret, true or divine knowledge. Being hymns found in the Veda the Narayana Hridayam and Laxmi Hridayam Stotras are highly efficacious. They also contain recondite vedantic truths which may be found in the upanishads, puranas, Bhagavad Gita etc. These truths are also to be seen in other stotras and in the hymns of later acharyas. लक्ष्मीहृदयके स्तोत्रे सर्वमन्यत् प्रकाशितम् । (NH - 33). So, to describe them as hridayam is very apt. They are, therefore, very precious. For these reasons they are considered very sacred and therefore secret - not to be easily given out. गोप्यमेतत्सदा कुर्यात् न सर्वत्र प्रकाशयेत्। says Narayana Hridayam (34) in its later part. Because of this restriction these stotras were handed down from a worthy guru to deserving disciples only. They were not freely available like Vishnu Sahasranamam.

Only some noteworthy features of this LH stotram could be mentioned in this brief introduction. The reader is requested to read the comments given to the NH (that is available in this site under the headimg VISHNU). to get a complete picture of the two stotras that are linked together.

LH:- The first fifteen verses praise Laxmi Devi and offer salutations to Her. Since She is the mother of all creation, She can bless the devotee with all material wealth. But, She is inseparable from the Lord. This is said by saying that one is within the other.

नारायणस्य हृदये भवती यथाऽऽस्ते,
    नारायणोऽपि तव हृत्कमले तथास्ते ।
नारायणस्त्वमपि नित्यविभू तथैव,
    तौ तिष्ठतां ममापि दयान्वितौ श्रीः ॥

She is with the Lord at all places.

यथा वैकुण्ठनगरे यथा वै क्षीरसागरे ।

तथा मद्भवने तिष्ठ स्थिरं विष्णुना सह ॥

योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥

She is also the Self seated in the heart of all beings She is stated to be सर्वभूतान्तरस्था in the LH. So is not different from the Lord who also says He is the Self seated in the heart of all beings.
अहमात्मा गुडाकेश सर्वभूताशयस्थितः । BG(10-20).
Thus, it is evident that She is identical with Narayana and can confer all that one may seek including liberation or mokSha. This is said in the LH as गत्यै नमोऽस्तु वरसद्गतिदायकायै।
Further, it is to be noted that if one's accumulated karmas stand in the way of one progressing towards liberation in the form of the "writing on the head" (ललाटलिखिता रेखा) by of the creator Brahma, She, being the creator of every thing with name and form including Brahma, can alter the same and help in his progress.

लिलेख निटिले विधिर्मम लिपिं विसृज्यान्तरं
त्वया विलिखितव्यमेतदिति तत्फलप्राप्तये ।
तदन्तिकफलस्फुटं कमलवासिनि श्रीरिमां
समर्पय समुद्रिकां सकलभाग्यसंसूचिकाम् ॥ (LH)

Here, the word "creator" does not mean She has created something out of nothing, but only means She has evolved as everything. She has become Brahma the creator and Vishnu the protector also.
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी। LS(114)
Shri Vedanta Desika uses this idea in his Shri Hayagriva Stotram (verse 20).

विलुप्तमूर्धन्यलिपिक्रमाणां सुरेन्द्रचूडापदलालितानाम् ।
त्वदङ्घ्रिराजीवरजःकणानां भूयान् प्रसदो मयि नाथ भूयात् ॥

The great acharya prays to the Lord that the pollen dust of His Lotus Feet should fall on his head so as to remove the letters written by Brahma at his birth. He indicates that even gods like Indra salute His feet with the same idea; that is; the dust of Lord's feet should fall

on their heads and alter their fate as decreed by the scribbling of Brahma on their head. Lord Krishna gives the assurance to Arjuna in BG(18-52) that with his mind firmly fixed on Him he will cross over all difficulties on his spiritual path.

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।

The LH repeatedly asks for the fulfilment of the first two of the four goals (viz.) wealth and enjoyment of pleasures of life got from wealth. But wealth in the hands of one without discretion can have disastrous consequences. It can lead one away from the spiritual path and to his downfall. Our scriptures warn one of this and say that one who hoards wealth without sharing with the needy is indeed a thief and deserves punishment. BG(VII-XIV-89)

यावद्भ्रियते जठरं तावत् स्वत्त्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥

Keeping this injunction in mind, the devotee asks for wisdom before seeking wealth and also asks Her to bless the heart with compassion to enable him to share the wealth liberally with others.

विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिं हृदये कुरु श्रीः ।
दयासुवृष्टिं कुरुतां मयि श्रीः सुवर्णवृष्टिं कुरु मे करे श्रीः ॥

The end portion contains some significant requests. We saw that the LH repeatedly asks for good things of life, wisdom etc. But as stated earlier whatever is got by our own efforts or karma will be finite and so will not last for long. Our life will continue to have fluctuations. The better and wiser alternative is to make the Lord stay in our hearts for ever by having steadfast devotion to Him . Then all auspicious things will be with us for ever. So, the LH asks for श्रीशार्ङ्घ्रिभक्तिः । or devotion to the feet of the Lord first.

श्रीशार्ङ्घ्रिभक्तिं हरिदास्यदास्यं प्रसन्नमन्त्रार्थदृढैकनिष्ठाम् ।
गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रीः ॥

The saint Kulasekhara also asked - not for the three purushartas -

dharma, artha and kama. He says that let events, good or bad, happen according to karmas he had done. He prays to the Lord to grant him unwavering devotion to His lotus like feet in this and in future births. (Mukundamala).

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
    यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
    त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥

The Vishnu Purana says the same truth by stating that those who may be bereft of worldly possesions and so termed "poor" in the worldly sense are really rich if their hearts have the wealth of love for Shri Hari. The reason is that Shri Hari also stays in their hearts being tied with cords of love.

सकलभुवनमध्ये निर्धनास्तेऽपि धन्या
    निवसति हृदि येषां श्रीहरेर्भक्तिरेका ।
हरिरपि निजलोकं सर्वथा तं विहाय
    प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥

So, the prayer is to grant before other things, devotion to the feet of the Lord.

Another prayer is to being a servant to the servants of Hari. Our scriptures repeatedly stress the importance of service to the devotees of the Lord.

The sage Naradha says in his Bhakti Sutra (No: 39-42) that the company of the devotees of the Lord is difficult to obtain. It never fails to produce beneficial results. It is got by the grace of God only. Thers is no difference between the Lord and His devotees. So, one should strive to get it.

महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च ।
लभ्यतेऽपि तत्कृपयैव । तस्मिंस्तत्जने भेदाभावात् ।
तदेव साध्यतां, तदेव साध्यताम् ॥

In Shrimad Bhagavatam we have the story of Lord's incarnation as Rishaba Deva. Before renouncing His kingdom and taking to the forests, He talks to His sons about the value of human life and how they should work for liberation. Though Rishaba Deva says He is an incarnation Himself, He advises His sons, not to surrender to Him, but to seek the company of devotees and serve them saying it is the doorway to liberation. महत्सेवां द्वारमाहुः विमुक्तेः ।
Coming from the mouth of the Lord, as an incarnation, it shows the immense value of service to the devotees of the Lord. The company of the devotees removes the impurities in the mind, brings calmness to the mind. More importantly it instils faith in the statements of the scriptures and acharyas known as shraddha. श्रद्धा।. Only one who is keenly interested, has controlled his senses and has shraddha can gain knowledge, says Krishna. BG(4-39). श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः । One gets the qualifications required for acquiring vedantic knowledge.
Shri Shankaracharya glorifies the association of the devotees in his Sivanandhalahari by saying it as great as the company of the Lord Himself.
सामीप्यं शिवभक्ति-धुर्य-जनता-साङ्गत्य सम्भाषणे।
Once the mind is clear of impurities like greed, anger etc., and also imbibed noble qualities from the association of the devotees, God sends him a suitable guru. The vedatic wisdom has necessarily to be obtained from the guru's mouth.
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । MU(1-2-12). Krishna also advised Arjuna to serve men of wisdom and seek knowledge. BG(4-34).
तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥
The guru's teachings remove the doubts that may be clouding the student's mind and his intellect becomes clear, said here as निर्मलबोधबुद्धिः । The upanishad says that a person endowed with discriminating intellect, has controlled his mind and has got

concentration, reaches the end of the very very long road, that is known as samsara and reaches the supreme goal and becomes free from all bondages. This is known as liberation and said herein as परमं पदम् । highest abode of Vishnu or Brahman.

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ KU(1-3-9)

The word परमं पदम् । mentioned here is a well known name of the Lord VS(732). पदमनुत्तमम् एवम् पद्यते गम्यते मुमुक्षुभिरिति पदम् । यस्मादुत्कृष्टं नास्ति तदनुत्तमम् । It is the higest place or goal that is attained by the seekers of liberation. "Attaining" does not imply going to some far of place like Vaikunta or Kailasa. Liberation means understanding ones own true divine nature and abiding in it. This is said here as विष्णोः परमं पदम् । or the highest place of all-pervading Brahman, of the supreme Self.

CONCLUSION. The end portion says the benefits one may get by reciting the LH. It assures that the Goddess Laxmi will fulfil the desires of Her devotee and look after him like Her son. There is a story in the Mahabharata to illustrate this. Balarama, the elder brother of Krishna, planned to get his sister Subhadra married to Duryodhana. In the mean time Arjuna happened to look at her and was captivated by her bewitching beauty. His mind was set on marrying her and wanted to talk about his wish to his friend Krishna. But he was worried at the same time that, if Krishna agreed to help him and took steps, it may create a rift between the brothers Krishna and Balarama. He was at his wit's end and wanted a way out the predicament. He prayed to sage Vyasa who promptly appeared before him. He put his problem before the sage and requested his help. The sage taught him LH and asked him to recite the stotram in the prescence of a lamp lighted with ghee and assured him that he will succeed in his endeavour. Arjuna followed the sage's advice, recited the LH with faith and married Subhadra in the end.

It will be evident from what is said here that both the NH and LH are valuable hymns and like veritable mines of precious gems. An interested reader will be

able to find more gems if he digs deep into them. The greater benefit will be, that by reciting them regularly, one will develop devotion to Divine Couple, Lord Narayana and Goddess Laksmi, and reap their abundant grace. Now follows the stotram LAXMI HRIDAYAM.

॥ ॐ तत्सत् ॥

# श्रीलक्ष्मीहृदयस्तोत्रम्

## अथ स्तोत्रम् ।

अस्य श्री आद्यादि श्रीमहालक्ष्मी-हृदय-स्तोत्र-महामन्त्रस्य भार्गव ऋषिः(शिरसि),
अनुष्टुभादि नानाछन्दांसि (मुखे), आद्यादि-श्रीमहालक्ष्मी सहित नारायणो देवता (हृदये)॥

। ॐ बीजं, ह्रीं शक्तिः, ऐं कीलकम् ।
आद्यादि-श्रीमहालक्ष्मी-प्रसादसिद्ध्यर्थं जपे विनियोगः ॥

ओम् ॥ "आद्यादि-श्रीमहालक्ष्मी देवतयै नमः" हृदये, "श्रीं बीजायै नमः" गुह्ये,
"ह्रीं शक्त्यै नमः" पादयोः, "ऐं बलायै नमः" मूर्धादि-पाद-पर्यन्तं विन्यसेत् ॥

ओम् श्रीं ह्रीं ऐं करतल-करपार्श्वयोः, श्रीं अङ्गुष्ठाभ्यां नमः,
ह्रीं तर्जनीभ्यां नमः, ऐं मध्यमाभ्यां नमः, श्रीं अनामिकाभ्यां नमः,
ह्रीं कनिष्ठिकाभ्यां नमः, ऐं करतल करपृष्ठाभ्यां नमः ॥

ॐ हृदयाय नमः, ह्रीं शिरसे स्वाहा, ऐं शिखायै वषट्,
श्रीं कवचाय हुम्, ह्रीं नेत्राभ्यां वौषट्, भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ अथ ध्यानम् ॥

हस्तद्वयेन कमले धारयन्तीं स्वलीलया ॥

हार-नूपुर-संयुक्तां महालक्ष्मीं विचिन्तयेत् ॥

कौशेय-पीतवसनामरविन्दनेत्राम्
पद्मद्वयाभय-वरोद्यत-पद्महस्ताम् ।
उद्यच्छतार्क-सदृशां परमाङ्क-संस्थां
ध्यायेत् विधीशनत-पादयुगां जनित्रीम् ॥

॥श्रीलक्ष्मी-कमलधारिण्यै सिंहवाहिन्यै स्वाहा ॥

पीतवस्त्रां सुवर्णाङ्गीं पद्महस्त-द्वयान्विताम् ।
लक्ष्मीं ध्यात्वेति मन्त्रेण स भवेत् पृथिवीपतिः ॥

मातुलङ्ग-गदाखेटे पाणौ पात्रञ्च बिभ्रती ।
वागलिङ्गञ्च मानञ्च बिभ्रती नृपमूर्धनि ॥

। ॐ श्रीं ह्रीं ऐम् ।
वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां
तेजोरूपां कनक-वसनां सर्वभूषोज्ज्वलाङ्गीम् ।
बीजापूरं कनक-कलशं हेमपद्मं दधानाम्
आद्यां शक्तिं सकलजननीं विष्णु-वामाङ्कसंस्थाम् ॥ १॥

श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ।
सर्वकाम-फलावाप्ति-साधनैक-सुखावहाम् ॥ २॥

स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ।
त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥ ३॥

समस्त-सम्पत्सुखदां महाश्रियं
समस्त-कल्याणकरीं महाश्रियम् ।
समस्त-सौभाग्यकरीं महाश्रियं
भजाम्यहं ज्ञानकरीं महाश्रियम् ॥ ४॥

विज्ञानसम्पत्सुखदां महाश्रियं
विचित्र-वाग्भूतिकरीं मनोहराम् ।
अनन्त-सौभाग्य-सुखप्रदायिनीं
नमाम्यहं भूतिकरीं हरिप्रियाम् ॥ ५॥

समस्त-भूतान्तरसंस्थिता त्वं
समस्त-भक्तेश्वरि विश्वरूपे ।
तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु
त्वत्पादपद्मं प्रणमाम्यहं श्रीः ॥ ६॥

दारिद्र्य-दुःखौघ-तमोऽपहन्त्रि त्वत्-पादपद्मं मयि सन्निधत्स्व ।
दीनार्ति-विच्छेदन-हेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः ॥ ७॥

विष्णु-स्तुतिपरां लक्ष्मीं स्वर्णवर्णां स्तुति-प्रियाम् ।
वरदाभयदां देवीं वन्दे त्वां कमलेक्षणे ॥ ८॥

अम्ब प्रसीद करुणा-परिपूर्ण-दृष्ट्या

मां त्वत्कृपाद्रविणगेहमिमं कुरुष्व ।
आलोकय प्रणत-हृद्गत-शोकहन्त्रि
त्वत्पाद-पद्मयुगलं प्रणमाम्यहं श्रीः ॥ ९॥

शान्त्यै नमोऽस्तु शरणागत-रक्षणायै
कान्त्यै नमोऽस्तु कमनीय-गुणाश्रयायै ।
क्षान्त्यै नमोऽस्तु दुरितक्षय-कारणायै
धात्र्यै नमोऽस्तु धन-धान्य-समृद्धिदायै ॥ १०॥

शक्त्यै नमोऽस्तु शशिशेखर-संस्थितायै
रत्यै नमोऽस्तु रजनीकर-सोदरायै ।
भक्त्यै नमोऽस्तु भवसागर-तारकायै
मत्यै नमोऽस्तु मधुसूदन-वल्लभायै ॥ ११॥

लक्ष्म्यै नमोऽस्तु शुभ-लक्षण-लक्षितायै
सिद्ध्यै नमोऽस्तु सुर-सिद्ध-सुपूजितायै ।
धृत्यै नमोऽस्तु मम दुर्गति-भञ्जनायै
गत्यै नमोऽस्तु वरसद्गति-दायकायै ॥ १२॥

देव्यै नमोऽस्तु दिवि देवगणार्चितायै
भूत्यै नमोऽस्तु भुवनार्ति-विनाशनायै ।
शान्त्यै नमोऽस्तु धरणीधर-वल्लभायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तम-वल्लभायै ॥ १३॥

सुतीव्र-दारिद्र्य-तमोऽपहन्त्र्यै नमोऽस्तु ते सर्व-भयापहन्त्र्यै ।
श्रीविष्णु-वक्षःस्थल-संस्थितायै नमो नमः सर्व-विभूति-दायै ॥ १४॥

जयतु जयतु लक्ष्मीः लक्षणालङ्कृताङ्गी
जयतु जयतु पद्मा पद्मसद्माभिवन्द्या ।
जयतु जयतु विद्या विष्णु-वामाङ्क-संस्था
जयतु जयतु सम्यक् सर्व-सम्पत्करी श्रीः ॥ १५॥

जयतु जयतु देवी देवसङ्घाभिपूज्या
जयतु जयतु भद्रा भार्गवी भाग्यरूपा ।
जयतु जयतु नित्या निर्मलज्ञानवेद्या
जयतु जयतु सत्या सर्वभूतान्तरस्था ॥ १६॥

जयतु जयतु रम्या रत्नगर्भान्तरस्था
    जयतु जयतु शुद्धा शुद्धजाम्बूनदाभा ।
जयतु जयतु कान्ता कान्तिमद्भासिताङ्गी
    जयतु जयतु शान्ता शीघ्रमागच्छ सौम्ये ॥ १७॥

यस्याः कलायाः कमलोद्भवाद्या रुद्राश्च शक्रप्रमुखाश्च देवाः ।
जीवन्ति सर्वेऽपि सशक्तयस्ते प्रभुत्वमाप्ताः परमायुषस्ते ॥ १८॥

॥ मुखबीजम् ॥ ॐ-ह्रां-ह्रीं-अं-आं-यं-दुं-लं-वम् ॥

लिलेख निटिले विधिर्मम लिपिं विसृज्यान्तरं
    त्वया विलिखितव्यमेतदिति तत्फलप्राप्तये ।
तदन्तिकफलस्फुटं कमलवासिनि श्रीरिमां
    समर्पय स्वमुद्रिकां सकलभाग्यसंसूचिकाम् ॥ १९॥

॥ पादबीजम् ॥ ॐ-अं-आं-ईं-एं-ऐं-कं-लं-रं ॥

कलया ते यथा देवि जीवन्ति सचराचराः ।
तथा सम्पत्करी लक्ष्मि सर्वदा सम्प्रसीद मे ॥ २०॥

यथा विष्णुर्ध्रुवं नित्यं स्वकलां संन्यवेशयत् ।
तथैव स्वकलां लक्ष्मि मयि सम्यक् समर्पय ॥ २१॥

सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे ।
अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥ २२॥

मुदास्तां मत्फाले परमपदलक्ष्मीः स्फुटकला
    सदा वैकुण्ठश्रीर्निवसतु कला मे नयनयोः ।
वसेत्सत्ये लोके मम वचसि लक्ष्मीर्वरकला
    श्रियश्वेतद्वीपे निवसतु कला मे स्व-करयोः ॥ २३॥

॥ नेत्रबीजम् ॥ ॐ-घ्रां-घ्रीं-घ्रें-घ्रैं-घ्रों-घ्रौं-घ्रं-घ्रः ॥

तावन्नित्यं ममाङ्गेषु क्षीराब्धौ श्रीकला वसेत् ।
सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मीपतिः श्रियौ ॥ २४॥

सर्वमङ्गलसम्पूर्णा सर्वैश्वर्यसमन्विता ।
आद्याऽऽदिश्रीर्महालक्ष्मीस्त्वत्कला मयि तिष्ठतु ॥ २५॥

अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रकाशिका ।

सर्वैश्वर्यप्रदा मेऽस्तु त्वत्कला मयि संस्थिता ॥ २६॥

अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा यथा ।
वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥ २७॥

ऐश्वर्यमङ्गलोत्पत्तिः त्वत्कलायां निधीयते ।
मयि तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥ २८॥

भवदावेशभाग्यार्हो भाग्यवानस्मि भार्गवि ।
त्वत्प्रसादात्पवित्रोऽहं लोकमातर्नमोऽस्तु ते ॥ २९॥

पुनासि मां त्वत्कलयैव यस्मात्
अतस्समागच्छ ममाग्रतस्त्वम् ।
परं पदं श्रीर्भव सुप्रसन्ना
मय्यच्युतेन प्रविशादिलक्ष्मीः ॥ ३०॥

श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः ।
नारायणेन सह मां कृपादृष्ट्याऽवलोकय ॥ ३१॥

सत्यलोकस्थिते लक्ष्मि त्वं ममागच्छ सन्निधिम् ।
वासुदेवेन सहिता प्रसीद वरदा भव ॥ ३२॥

श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते ।
विष्णुना सहिता देवि जगन्मातः प्रसीद मे ॥ ३३॥

क्षीराम्बुधिस्थिते लक्ष्मि समागच्छ समाधवे ।
त्वत्कृपादृष्टिसुधया सततं मां विलोकय ॥ ३४॥

रत्नगर्भस्थिते लक्ष्मि परिपूर्णहिरण्मयि ।
समागच्छ समागच्छ स्थित्वाऽऽशु पुरतो मम ॥ ३५॥

स्थिरा भव महालक्ष्मि निश्चला भव निर्मले ।
प्रसन्नकमले देवि प्रसन्नहृदया भव ॥ ३६॥

श्रीधरे श्रीमहालक्ष्मि त्वदन्तःस्थं महानिधिम् ।
शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय ॥ ३७॥

वसुन्धरे श्रीवसुधे वसुदोग्ध्रि कृपामयि ।
त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे सम्प्रदर्शय ॥ ३८॥

विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे ।

त्वद्गर्भगतहेमादीन् सम्प्रदर्शय दर्शय ॥ ३९॥

रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः ।
न जाने परमं रूपं मातर्मे सम्प्रदर्शय ॥ ४०॥

आविर्भव मनोवेगात् शीघ्रमागच्छ मे पुरः ।
मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ॥ ४१॥

देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते ।
मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ॥ ४२॥

उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि ।
अक्षयान् हेमकलशान् सुवर्णेन सुपूरितान् ॥ ४३॥

निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः ।
समुन्नतानना भूत्वा सम्यग्धेहि धरातलात् ॥ ४४॥

मत्सन्निधिं समागच्छ मदाहितकृपारसात् ।
प्रसीद श्रेयसां दोग्ध्रि लक्ष्मि मे नयनाग्रतः ॥ ४५॥

अत्रोपविश्य लक्ष्मि त्वं स्थिरा भव हिरण्मयी ।
सुस्थिरा भव सम्प्रीत्या प्रसन्ना वरदा भव ॥ ४६॥

आनीतांस्तु त्वया देवि निधीन्मे सम्प्रदर्शय ।
अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा ॥ ४७॥

मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ।
अभयं कुरु मे देवि महालक्ष्मि नमोऽस्तु ते ॥ ४८॥

समागच्छ महालक्ष्मि शुद्धजाम्बूनद-स्थिते ।
प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ ४९॥

लक्ष्मीर्भुवं गता भासि यत्र यत्र हिरण्मयी ।
तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥ ५०॥

क्रीडन्ती बहुधा भूमौ परिपूर्णकृपा मयि ।
मम मूर्धनि ते हस्तमविलम्बितमर्पय ॥ ५१॥

फलद्भाग्योदये लक्ष्मि समस्तपुरवासिनि ।
प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे ॥ ५२॥

अयोध्यादिषु सर्वेषु नगरेषु समास्थिते ।
विभवैर्विविधैर्युक्तैः समागच्छ मुदान्विते ॥ ५३॥

समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ।
करुणारसनिष्यन्दनेत्रद्वयविशालिनि ॥ ५४॥

सन्निधत्स्व महालक्ष्मि त्वत्पाणिं मम मस्तके ।
करुणासुधया मां त्वमभिषिच्य स्थिरं कुरु ॥ ५५॥

सर्वराजगृहे लक्ष्मि समागच्छ बलान्विते ।
स्थित्वाऽऽशु पुरतो मेऽद्य प्रसादेनाभयं कुरु ॥ ५६॥

सादरं मस्तके हस्तं मम त्वं कृपयाऽर्पय ।
सर्वराजस्थिते लक्ष्मि त्वत्कला मयि तिष्ठतु ॥ ५७॥

आद्यादि श्रीर्महालक्ष्मि विष्णुवामाङ्कसंस्थिते ।
प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥ ५८॥

प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे ।
अचला भव सुप्रीता सुस्थिरा भव मद्गृहे ॥ ५९॥

यावत्तिष्ठन्ति वेदाश्च यावच्चन्द्र-दिवाकरौ ।
यावद्विष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ॥ ६०॥

चान्द्री कला यथा शुक्ले वर्धते सा दिने दिने ।
तथा दया ते मय्येव वर्धतामभिवर्धताम् ॥ ६१॥

यथा वैकुण्ठनगरे यथा वै क्षीरसागरे ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ ६२॥

योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ ६३॥

नारायणस्य हृदये भवती यथाऽऽस्ते
    नारायणोऽपि तव हृत्कमले यथाऽऽस्ते ।
नारायणस्त्वमपि नित्यविभू तथैव
    तौ तिष्ठतां हृदि ममापि दयान्वितौ श्रीः ॥ ६४॥

विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिं कुरु मे गृहे श्रीः ।
दयासुवृद्धिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे गृहे श्रीः ॥ ६५॥

न मां त्यजेथाः श्रितकल्पवल्लि सद्भक्ति-चिन्तामणि-कामधेनो ।
न मां त्यजेथा भव सुप्रसन्ने गृहे कलत्रेषु च पुत्रवर्गे ॥ ६६॥

॥ कुक्षिबीजम् ॥ ॐ-अं-आं-ईं-एं-ऐं ॥

आद्यादिमाये त्वमजाण्डबीजं त्वमेव साकार-निराकृती त्वम् ।
त्वया धृताश्चाब्जभवाण्डसङ्घाश्चित्रं चरित्रं तव देवि विष्णोः ॥ ६७॥

ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः ।
महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥ ६८॥

अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥ ६९॥

भवन्तं शरणं गत्वा कृतार्थाः स्युः पुरातनाः ।
इति सञ्चिन्त्य मनसा त्वामहं शरणं व्रजे ॥ ७०॥

अनन्ता नित्यसुखिनः त्वद्भक्तास्त्वत्परायणाः ।
इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे ॥ ७१॥

तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित् ।
इति सञ्चिन्त्य सञ्चिन्त्य प्राणान् सन्धारयाम्यहम् ॥ ७२॥

त्वदधीनस्त्वहं मातः त्वत्कृपा मयि विद्यते ।
यावत्सम्पूर्णकामः स्यां तावद्देहि दयानिधे ॥ ७३॥

क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना ।
न हि जीवन्ति  जलजा जलं त्यक्त्वा जलाश्रयाः ॥ ७४॥

यथा हि पुत्रवात्सल्यात् जननी प्रस्नुतस्तनी ।
वत्सं त्वरितमागत्य सम्प्रीणयति वत्सला ॥ ७५॥

यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामकी ।
दयापयोधर-स्तन्य-सुधाभिरभिषिञ्च माम् ॥ ७६॥

मृग्यो न गुणलेशोऽपि मयि दोषैक-मन्दिरे ।
पांसूनां वृष्टिबिन्दूनां दोषाणां च न मे मतिः ॥ ७७॥

पापिनामहमेकाग्रो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ ७८॥

विधिनाहं न सृष्टश्चेत् न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ ७९॥

कृपा मदग्रजा किं ते अहं किं वा तदग्रजः ।
विचार्य देहि मे वित्तं तव देवि दयानिधे ॥ ८०॥

माता पिता त्वं गुरुः सद्गतिः श्रीः
त्वमेव सञ्जीवनहेतुभूता ।
अन्यं न मन्ये जगदेकनाथे
त्वमेव सर्वं मम देवि सत्यम् ॥ ८१॥

॥ हृदय बीजम् ॥

ॐ-घ्रां-घ्रीं-घ्रूं-घ्रें-घ्रों-घ्रः-हुं फट् कुरु कुरु स्वाहा ॥

आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञानसुखैकदोग्ध्रि ।
अज्ञानहन्त्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना ॥ ८२॥

अशेषवाग्जाड्य-मलापहन्त्री नवं नवं सुष्टु सुवाक्यदायिनी ।
ममैव जिह्वाग्रसुरङ्गवर्तिनी भव प्रसन्ना वदने च मे श्रीः ॥ ८३॥

समस्तसम्पत्सु विराजमाना समस्ततेजस्सु विभासमाना ।
विष्णुप्रिये त्वं भव दीप्यमाना वाग्देवता मे नयने प्रसन्ना ॥ ८४॥

सर्वप्रदर्शे सकलार्थदे त्वं प्रभासुलावण्यदयाप्रदोग्ध्रि ।
सुवर्णदे त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ॥ ८५॥

सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयापहन्त्री ।
सर्वोन्नता त्वं सुमुखी च नः श्रीर्हिरण्मयी मे भव सुप्रसन्ना ॥ ८६॥

समस्त-विघ्नौघ-विनाशकारिणी समस्त-भक्तोद्धरणे विचक्षणा ।
अनन्तसम्मोद-सुखप्रदायिनी हिरण्मयी मे नयने प्रसन्ना ॥ ८७॥

देवि प्रसीद दयनीयतमाय मह्यं
देवाधिनाथ-भव-देवगणाभिवन्द्ये ।
मातस्तथैव भव सन्निहिता दृशोर्मे
पत्या समं मम मुखे भव सुप्रसन्ना ॥ ८८॥

मा वत्स भैरभयदानकरोऽर्पितस्ते
मौलौ ममेति मयि दीनदयानुकम्पे ।

मातः समर्पय मुदा करुणाकटाक्षं
    माङ्गल्यबीजमिह नः सृज जन्म मातः ॥ ८९॥

॥ कण्ठबीजम् ॥ ॐ-श्रां-श्रीं-श्रूं-श्रैं-श्रौं-श्रं-श्राः ॥

कटाक्ष इह कामधुक् तव मनस्तु चिन्तामणिः
    करः सुरतरुः सदा नवनिधिस्त्वमेवेन्दिरे ।
भवेत्तव दयारसो मम रसायनं चान्वहं
    मुखं तव कलानिधिर्विविध-वाञ्छितार्थप्रदम् ॥ ९०॥

यथा रसस्पर्शनतोऽयसोऽपि सुवर्णता स्यात्कमले तथा ते ।
कटाक्षसंस्पर्शनतो जनानाममङ्गलानामपि मङ्गलत्वम् ॥ ९१॥

देहीति नास्तीति वचः प्रवेशाद् भीतो रमे त्वां शरणं प्रपद्ये ।
अतः सदास्मिन्नभयप्रदा त्वं सहैव पत्या मयि सन्निधेहि ॥ ९२॥

कल्पद्रुमेण मणिना सहिता सुरम्या
    श्रीस्ते कला मयि रसेन रसायनेन ।
आस्तामतो मम च दृक्करपाणिपाद-
    स्पृष्ट्याः सुवर्णवपुषः स्थिरजङ्गमाः स्युः ॥ ९३॥

आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्या मम सन्निधेहि ।
आद्यादिलक्ष्मि त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् ॥ ९४॥

आद्यादिलक्ष्मीहृदयं पठेद्यः स राज्यलक्ष्मीमचलां तनोति ।
महादरिद्रोऽपि भवेद्धनाढयः तदन्वये श्रीः स्थिरतां प्रयाति ॥ ९५॥

यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा ।
तस्याभीष्टं ददत्याशु तं पालयति पुत्रवत् ॥ ९६॥

इदं रहस्यं हृदयं सर्वकामफलप्रदम् ।
जपः पञ्चसहस्रं तु पुरश्चरणमुच्यते ॥ ९७॥

त्रिकालमेककालं वा नरो भक्तिसमन्वितः ।
यः पठेत् शृणुयाद्वापि स याति परमां श्रियम् ॥ ९८॥

महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे ।
इदं श्रीहृदयं जप्त्वा पञ्चवारं धनी भवेत् ॥ ९९॥

अनेन हृदयेनान्नं गर्भिण्या अभिमन्त्रितम् ।

ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥ १००॥

नरेणाप्यथवा नार्या लक्ष्मीहृदयमन्त्रिते ।
जले पीते च तद्वंशे मन्दभाग्यो न जायते ॥ १०१॥

य आश्वयुङ्मासि च शुक्लपक्षे रमोत्सवे सन्निहिते च भक्त्या ।
पठेत्तथैकोत्तरवारवृद्ध्या लभेत्स सौवर्णमयीं सुवृष्टिम् ॥ १०२॥

य एकभक्त्याऽन्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी ।
स मन्दभाग्योऽपि रमाकटाक्षात् भवेत्सहस्राक्षशताधिकश्रीः ॥ १०३॥

श्रीशांघ्रिभक्तिं हरिदासदास्यं प्रपन्नमन्त्रार्थदृढैकनिष्ठाम् ।
गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रीः ॥ १०४॥

पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्थसिद्धिम् ।
सम्पूर्णकीर्तिं बहुवर्षभोगं प्रदेहि मे देवि पुनःपुनस्त्वम् ॥ १०५॥

वादार्थसिद्धिं बहुलोकवश्यं वयःस्थिरत्वं ललनासु भोगम् ।
पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्मजन्मनि ॥ १०६॥

सुवर्णवृद्धिं कुरु मे गृहे श्रीः विभूतिवृद्धिं कुरू मे गृहे श्रीः ।
कल्याणवृद्धिं कुरु मे गृहे श्रीः विभूतिवृद्धिं कुरु मे गृहे श्रीः ॥ १०७॥

॥ शिरो बीजम् ॥ ॐ-यं-हं-कं-लं- वं-श्रीम् ॥

ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां
    विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं
    भर्त्रायुक्तां मुहुरभयदां मह्यमप्यच्युतश्रीः ॥ १०८॥

॥ इति श्रीअथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रं सम्पूर्णम् ॥

This should be chanted together with Narayanahridayastotram for greater benefits.

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com,

Proofreading and commentary by N.Balasubramanian

Proofread by PSA Easwaran

*Shri Lakshmi Hridaya Stotram*

pdf was typeset on March 5, 2023

Please send corrections to *sanskrit@cheerful.com*